This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

3520

अथ वैजलउपारंभः पत्र २६
संवत् १९०० ई

Checked 2012

Acc. NO. ~~3520~~ M-1898
Title - प्रबोध-चन्द्रिका.
Author - वैजलभूपति.
Date - संवत 1906.
subject - व्याकरण.

folio - 26.
Xerox - 52.

KKSU LIBRARY
RAMTEK
441 106
M-1895
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणः कालेऽचलेणपुंसि समेपुं
नपुंसकेत्रीतिहेमः २

रागानुरक्तेमात्सर्ज्जेकोशदोलोहितादिषुशांतसात्त्विकस्वप्रकाशे
कालोमतौमहाकालेसमयेयमरूपयोरितिविश्वः २

[redacted] हरिहरगुरुभक्तःसर्वलोकानुरक्तःस्थिरभुवनगतकीर्तिःकान्तिकन्दर्पमूर्त्तिः॥ रणरिपुगणकालोवैजलक्षोणिपालोजयतिजयसिंहो दानासर्वेकर्म्मविधौतौ॥१॥चन्द्रावतीवदनचन्द्रचकोरधीरःश्रीविक्रमार्कतनयोनयतत्त्ववेत्ता॥ चौहानवंशतिलकःपटनाधिनाथोराजापरंजयतिवैजलदेवनामा॥२॥रामोमेभिहितंकरोतुसततंरामंभजेसादरंरामेणप्रहृतंसमस्तदुरितंरामायतस्मैनमःरामान्मुक्तिरभीप्सितासरभसंरामस्यदासोस्म्यहंरामेरंजतुमेमनःकरुणयाहेरामभांपालयाशाश्रीमद्वैजलदेवनरेमभक्तिरस्तात्मनाइतिचिन्तितमेका

चंद्रःकर्पूरकेऽपि
सुसुधांशुस्व
र्णवारमोरिति
विश्वः ३

रात्र
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्मिन्याः पत्रपद्मिनीपत्रेपद्मिनीपत्रेजलेपद्मिनीपत्रजले।
नीपत्रजलेनतुल्यंसदृशंपद्मिनीपत्रजलवत् २

नैकदाचिन्निषेतामयाऽ०ऽअस्थिवज्रमयंयस्यस्यचर्म्मचवर्म्मीवत्॥
संदृढीचिःसंकरणश्चनोनिषेत्सुचिरंभुवि॥१॥नसंपत्तिरक्षणेनरज्या
निधनानिचा॥तेऽपिस्वर्गगतानोहिकीर्त्तिर्ज्जीवयतिभूतले॥६॥पद्मिनीपत्रज
लवत्संसारेसर्वमस्थिरम्॥कीर्त्तिरक्षरसंबद्धास्थिरंभवतिभूतले॥७॥
इहलोकेसुखंचैवनैपरलोकेऽपिजायते॥तद्वैपत्र्यहैकर्म्मकर्त्तव्यंदूरदर्शी
भिः॥८॥संसारार्म्भोधितरणेरामनामानुकीर्त्तनम्॥रामनामान्वितो
तस्मात्प्रक्रियाक्रियतेमया॥९॥बालानांसुप्रबोधायतोवार्थंचिदुषो
मपि॥आकल्पमचिंसंसारेकीर्त्तेर्वस्थापनायच॥१०॥चिन्तयन्निति

कस्मैप्रयोजनायेयंक्रियाक्रियते २ कीर्त्तेःऽवस्थापनंकीर्त्तेर्वस्थापनंतस्मै १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्य्यातः क्रीडतेश्रीहिरण्धरम्॥ श्रीमान्वैजलभूपालोंविलोकोत्सवन्नवी
त्सुतम्॥११॥ विद्ययोद्योततेराज्यंविद्ययाजीयतेरिपुः॥ विद्ययाजायते
कीर्त्तिंविद्ययाजायतेयशः॥१२॥ विद्ययाजायतेधर्म्मोधर्म्मेणार्थःप्र
जायते॥ अर्थेनजायतेराज्यंसुखंराज्येनजायते॥१३॥ विद्योपितेवैहि
तकृद्दृश्यामातेवरक्षिका॥ विद्याश्रियेवैसुखदाविद्याकल्पलतोपमा
॥१४॥ धनानामपिसर्व्वेषांविद्याधनमनुत्तमं॥ वर्द्धतेदीयमानंयन्ना
न्तरेचौद्विनश्यति॥१५॥ नृपैर्न्नैगृह्यतेस्वार्द्दाद्यादैर्न्नोविभज्यते॥

अन्तरेक्षिदेआयतेइतिअन्तरम्
तस्मात्अन्तरमात्र विद्योत्तरपःअन्तरः

भत्यैर्न्नभुज्यतेकिंचिन्नचसंशुष्यतेकचित्र्। १६। विद्याधनविहीनौं
यःसैकापुरुषउच्यते॥तस्माद्विद्यार्ज्जनेपुत्रयत्नंकुर्न्निरंतरम्। १७। रू२
यावन्नरएजंचर्य्यांतेयावन्नविषैयग्रहः॥यावन्नयौवनमदैस्तावद्वि
द्यामुपार्ज्जय। १८। औदार्य्यधैर्य्यगांभीर्यशौर्य्यादिगुणसंयुतः॥वि
द्याविनयसंपन्नःसर्वेषांभवतिप्रियः। १९। दानेनदययाचैवयुद्धे
ननिजकर्म्मणा॥दानवीरोदयावीरोयुद्धवीरइतिश्रुतिः। २०। दधी
चिर्द्दानवीरोभूद्दयावीरःशिबिर्न्नृपः॥हंवीरोयुद्धवीरोभून्निदर्शन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मभिप्रेयः।२१। स्वकर्म्मलौल्वपुरुषः प्रतिष्ठाधिक्षितौभवेत्॥यथाक्ले
ष्मश्चरग्मश्चजामदग्न्यश्चपौरुषात्। २२। इहरञ्जाचरंकैश्चप्राक्तनेन
स्वकर्मणा॥इहदुःखंसुखंचोभेभुंक्तेप्राक्तनकर्मणा। २३। स्वर्गंच
नरकंचोभेभजतेनिजकर्मणा॥स्वकृतंःकर्मपाशैर्यंसर्वैर्बांसुहृ
दित्यैयः।२४। एवंवदंतंपितरंविनीतःश्रीहिरण्धरः॥कृतांजलिपूटौ
भूत्वासव्रीडमिदमब्रवीत्। २५। मातापितृभ्यांविरसंपरिणामसु
खावहं॥तिक्तंकटुकषायंवाभेषजंपाय्यतेसुतैः। २६। श्रवणाज्जालि

अन्येतुमशकाःदुरुत्यःसुनरुत्यःसुरुत्यःसुरुत्यः३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोषीतेमुपदेशमतैमयो॥ आज्ञाप्तोदिवसयोकिमिहनोमधीयतामे।२७।
श्रीमान्वैजलभूपालैः श्रीहिरण्धरवालकैः॥ सुप्रीयंपरितुशात्मासुतेमि
त्यवदत्सुनः।२८। नीतिविद्योस्त्रविद्याचेदूरज्ञोभ्यर्हितेसदा॥ तयोरप्यधि
कानीतारज्यंहिक्रियतेयया।२९। क्रियाकारकविज्ञानान्नीतिः सम्य
क्कविविच्यते॥ स्याद्त्यादिपरिज्ञानाद्दुर्द्धिःशब्दोविवर्द्धते।३०। विना
व्याकरणंवाणीरमणीरमणंविना॥ विवेकंचविनालक्ष्मीर्नीसुखाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हत्यश्वरथपादातंसेनां गानिचतुष्टयं २

कदाचन। ३१। तस्माद्व्याकरणंपूर्वंपठित्वंबुद्धिवृद्धये॥पश्चान्नीतिंपठित्वा
त्वंराज्यंभजयथासुरवं। ३२। शक्तिराज्याङ्गसेनाङ्गत्रिवर्गोपायषड्गुणान्॥
यथाकालंप्रयुञ्जानोराजाराज्यंसमाचरेत्। ३३। क्रियाकारसम्बन्धु
ज्ञानंमुपायतोयथा॥उत्कृष्टंप्रक्रियासिद्धंत्वयासंप्रतिपद्यताम्। ३४।
प्रबोधचंद्रिकानामरमनामसमाश्रिता॥अज्ञाननिमिरध्वंसकारिणी
चित्तहारिणी। ३५। बहवःप्रक्रियाग्रंथासन्तिचेत्संतुकाक्षतिः॥मालती
मधुनःक्षीपैमधुपानामनादरः। ३६। विभक्तिज्ञानतोजस्मात्प्रबोधःप्र

भवेद्दुःसमा
रामभित्युपाय
चतुष्टयं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिपद्यते॥तस्मादिहप्रथमतौविभक्तिःप्रतिपद्यते।३७। स्यादित्यादिवि
भक्तीद्वेस्यादौसप्तविभक्तयः॥एकद्विबहुसंज्ञानिवचनानिचसप्तसु
।३८। प्रथमाचद्वितीयाचतृतीयाचतथाक्रमात्॥चतुर्थीपंचमीषष्ठी
सप्तमीचेतितास्क्रमात्।३९। प्रथमैवविक्तिस्यादुक्तेकर्त्तरिकर्त्तरि॥अ
नुक्तेकर्म्मकर्त्तादौद्वितीयाद्याविभक्तयः।४०। तत्रोक्तेकर्त्तरियथोरा
मौजयतिवैरिणः॥रणेरामौचरामोश्चजयतश्चजयन्तिच।४१। संबोध
नेपिप्रथमाविभक्तिर्भवतिध्रुवम्॥यथाहेरामहेरामौहेरामाइत्यनुक्रमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्॥ ४२॥ इत्युदाहरणंदत्तमुक्तेकर्त्तरिकेवलम्॥ अथोदाहरणंकिंचिदुक्तेकर्म्मणिदीयते॥ ४४॥ नंजीयतेनंजीयेतेनंजीयन्तेरणाङ्गणे॥ रामोरामौचेरामाश्चरक्षोभिश्चेतिनिश्चितम्॥ ४५॥ प्रथमान्तस्यकर्त्तुश्चकर्मणश्चानुगम्यते॥ संख्यात्यादैरनुक्तस्यनकदापीतिबुध्यताम्॥ ४६॥ अनुक्तेकर्म्मणिभवेत्तृतीयासानिदर्श्यते॥ रामंरामौचेरामाश्चभजाम्यहमहर्निशं॥ ४७॥ अनुक्तेकर्त्तरिभवेत्तृतीयाकरणेपिच॥ यथारामेणरामाभ्यांरामैर्वाजीयतेरिपुः॥ ४८॥ करणेदीयतेकिंचिदुदाहरणमुत्तमं॥ रामःशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रंसिरंचूर्णानिकृन्तन्तिभिन्नैः शस्त्रैः ४६। अनुक्तेसंप्रदानेस्यात्चतुर्थीसा
निगद्यते॥ फलैरमायंरमाभ्यांरमेभ्यश्चसमर्प्यते॥ ५०। अनुक्तेस्याद्पा
दानेपंचमीसानिगद्यते॥ यथारमाच्चरमाभ्यांरमेभ्योमुक्तिरुक्तिता
॥ ५१। अनुक्तेस्यात्तुसंबंद्धेषष्ठीतस्याउदाहृतिः॥ रमस्यरमयोश्चापिरा
माणांकीर्तिरुत्तमा॥ ५२। अनुक्तेचाधिकरणेसप्तमीज्ञायतेयथा॥ रमे
चरामयोश्चापिरामेषुश्रीर्विहारिणी॥ ५३। इत्युदाहृतयोदत्तासप्तस्वपिवि
भक्तिषु॥ केनचित्कारणेनोसांमन्यत्रावस्थितिर्यथा॥ ५४। श्रीरस्यासौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधिपूर्वाणांमाधारःकर्म्मतद्यथा॥अधिशेतेवनेरण्येऽध्यास्तेचोप्यधिस्मृति।५५। अन्वधिप्रतिशब्दानांयोगेकर्म्मभवेद्यथा॥अधिरण्यंरथेरण्यंप्रतिधावतिमेमनः।५६। अनुरण्यंप्रतिदिनंमानसंमेघसीदति॥कार्य्यनोश्वसंयोगेदिनेक्रोशंनिषीदति।५७। अन्तरेणान्तरायोगेद्वितीयास्याद्विनापिच॥नमुक्तिर्ज्ञायतेरण्यमन्तरेणान्तरंविना।५८। समयानिकषाहाधिगुपर्य्यध्यधसांमषि॥आङ्मर्य्यादयोगेनुभवेद्द्वितीयान्तमेवहि।५९। कानंसमयारण्योभरतोनिकषापुरी॥हासीनांविपिनेशून्ये

द्वितीया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रावणंधिर्जहारयः।६०। हरमूर्द्धन्मुपरिगङ्गाभान्तिहरेरपि॥अधिपादा
म्बुजंमधोरमपारंमहंरमे।६१। आरमपादंमनिशंश्रएतिःक्रियतेमया॥
रममावसतिस्वान्तेमदीयन्नावसीदति।६२। क्रियाविशेषणंकर्मनपुंस
कंमपीष्यते॥ यथानिःशंकमंनिशंलंकांरमोवलोकते।६३। तृतीयाजा
यतेहेतौतथैशंभूतलक्षणे॥ रममभक्तोभवेन्मुक्तीरामंश्चापेनकानने।६४
सहार्थेनयथारममोलक्ष्मणेनसहोच्छति॥ विनायोगेयथारामोलक्ष्मणेन
विनानहि॥६५॥ तृतीयासंप्रदानेर्थेनिन्दाचित्तदुदाहृतिः॥ मालतीदास्यतिं

निःशंकंपरस्यां क्रियायांयथा स्यातथा४

जगद्गुरु नगरस्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पापीयान्ब्राह्मणंसंघयच्छति ।६६। चतुर्थीगमभार्थस्यधातोःकर्म्मणिवा
यथा।जगामरुचंद्रोसौवनायपितुराज्ञया।६७। तादर्थेपियथादारुरा
मयूपायतिरुक्ति॥क्रियायोगेयथारामोभोजनायव्रजत्तेति।६८। नमः
स्वस्त्याद्दियोगेचयथारामायतेनमः॥स्वस्तिरामायदेवायस्वाहापित्रेस्व
धासदा।६९। सीताविरहविन्नोपिरामोलक्ष्मणमब्रवीत्॥वषट्कृष्णेचतु
र्थीस्वान्मन्यकर्म्मण्यनादरे।७०। यथात्वंहेतवेमन्येत्वंहेतवेयथा॥न
थाचतुर्थीरुच्यर्थधातोःयोगेभवेद्यथा।७१। रमायरोचतेनित्यंराघव

वै ज्ञ ३

मन्ये २

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रुध्यत्यसूयत्यसूयति द्रुह्यत्यसूयति लोभीर्ष्यत्यसौरणे३

स्यवधोद्यमः॥ ईप्सितेस्यहृद्यान्नोश्वरमायस्यहृद्यम्यहृद्यम्॥ ७२॥ उत्तम
र्णीचधारेस्तुतुभ्यंस्वंधारयाम्यहं॥ क्रुध्यादिकर्मणिश्यथारसः क्रुध्यति
शत्रवे॥ ७३॥ ईर्ष्यत्यसूयतिद्रुह्यत्यसूयपद्येक्षणेरणे॥ रसः शत्रुगणगये
तिचतुर्थीसमुदाहृता॥ ७४॥ पंचमीजायतेहेतौरसान्मुक्तिःप्रजायते॥ भयहेतौयथारसाद्बिभेतिधुधिरःजनः॥ ७५॥ यतस्त्राणंस्तत्रेयथारसःत्रायस्वमाम्भवात्॥ यतोधीतेयथाधीतेरसात्संदेशमाज्ञप्तिः॥
र्णेहायतोऽन्नंयथागङ्गाहरिपादात्प्रजायते॥ यस्माद्उत्कर्षणंतत्रेरसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीरेणवरेण्यतः।७७। वारणंचयतस्तत्रंमथादुर्विनयैस्मिता॥ तनयेवा
रक्षत्यिवंरमोमान्नरकान्नैवात्। ७८। अन्यार्थादिप्रयोगेचयथान्यो
रमेश्वरात्॥ भिनःकस्मात्प्रजास्यशोरमादेरंदूभीषणैः। ७९। रमं
न्नैवेतरस्येष्योनचेरमादृतेसुखम्॥ दिग्देशकालयोगेचग्नामान्मूर्वीश्चि
न्तिर्मम। ८०। उत्कृत्तास्मश्चिमंज्ञेयंपटनारण्यमुत्तमं॥रमोसौलक्ष्मण
नंज्येष्ठोविनायोगेपिदृश्यते। ८१। विनारमान्नेमुक्तिःस्यायतःस्या
न्नेक्षणेनतः॥ पंचमीस्याद्यथारमेःप्रासादान्नेक्षतेपुरीम्। ८२। स्मर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एणार्थस्यधातोर्वाषष्ठीकर्म्मणिनवथा॥ स्मरणमिरमेन्द्रस्यचरणंभोजयो
रहम्॥८३॥ हिंसार्थस्ययथारामःशत्रोरूर्ध्वंरयंलभन्॥ पिनष्टिरूजन्ती
त्यादिज्ञेयंसर्वत्रपंडितैः॥८४॥ तपेस्त्यर्थधातोः करणेवषीवाजायतेय-
था॥ तपोरामःफलैरेषफलानाम्वावनेवसन्॥८५॥ अनादरेचषष्ठीस्या
त्सप्तमीचयथातव॥ पश्यतोहरितिद्र्यंतस्करस्त्वयिपश्यति॥८६॥ वि
र्रीरेचषष्ठीस्यात्सप्तमीचयथावरंण॥ रामोनपाणौशरणंनरेषुविध
नुर्द्धरः॥८७॥ कृत्ययोगेथवाषष्ठीभवेत्कर्त्तरिनयथा॥ रावणस्यपुरीलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कागन्तव्यारम्भूपतेः। २८। सप्तमीसन्नियोगेस्यात्सन्निरमेकुतोभय
म्॥ सत्यर्थयोगेधियथारमेनरकभीर्न्नहि। २९। निमित्तात्कर्म्मसंयो
गेशरद्वेलेहंतिचर्म्मणि॥ निमित्तेचयथामुक्तोरमोर्थेसेव्यतेमया। ३०।
क्रियायचेत्क्रियालक्ष्यान्नचेस्यात्सप्तमीयथा॥ मथिष्यादन्निरामोगान्म
थ्यात्मभूपागतेः। ३१। एवंसर्वेषुलिङ्गेषुविभक्तिवचनेषुच॥ उक्तोनु
सारंविज्ञेयमुदाहरणमुत्तमम्। ३२। इतिश्रीबोधचन्द्रिकायांवङ्गलौवैजल
भूपतेः॥ विभक्तिचन्द्रिकामध्येसप्तमाप्तास्यादिचंद्रिका। ३३। ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथत्यादिविभक्तीनामुदाहरणमुच्यते॥ त्रयस्युः पुरुषास्त्रयोदेः त्रथमोमध्य
मोत्तमो॥१॥ एकद्विबहुसंख्यासुत्रिषुस्याद्यनत्रयो उदाहरणमेवैषां
रूपमाविर्भविष्यति॥२॥ त्रथमोनाम्निसंयोगेत्वनुयुक्तयोगेचमध्यमः॥
उत्तमोस्मत्रयोगेचगम्यमानेच्छयंविधिः॥३॥ यथाजयन्तिरामोरिपून्
रामोचजयतोरिपून्॥ रामाःजयन्तिसंग्रामेदुर्जनान्वैरिणोनरान्॥
४॥ जयस्वित्वंरिपुंरामंजयथोरिपुवोरणे॥ हंरामोयुध्यिहंमायूयंजय
थवैरिणः॥५॥ अहंजयामिरामस्यभक्त्यानरकंमागतं॥ आवांजयावः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तिनौजयामोवयेसुत्तमम् ।६। त्यादीनांनवपूर्वार्द्धंपरस्मैपदमुच्यते॥
उत्तरार्द्धंनवज्ञेयमात्मनेपदसंज्ञकं ॥७। परस्मैपदमादिर्यस्य धातोः कर्तरि
केवले॥ यथाँदन्तिरमोयंलक्ष्मणेनसहोदरम् ।८। आत्मनेपदमादिर्यस्य
भावेकर्मणिकर्तरि॥ तत्रभावेयथारण्येरमेणवर्तखिद्यते ।९। यथा
कर्मणिरमेणंजीयतेश्वपुरूद्धतैः॥ यथाकर्तरिरामस्यश्लेभतेमुखमि
न्दुवत् ।९०। सकर्मकाः कर्महीनाधातवोद्विविधामताः॥ सकर्मकानां
धातूनांत्यादिः कर्तरिकर्मणि ।९१। अकर्मकानांधातूनांभावेकर्तरिडा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतेः॥ रमतेरमचन्द्रोसौवनेरमेणरम्यते। १२। यथाकर्त्तरिरमोसौसं
खेजयतिवैरिणः॥ यथाकर्मणिरमेणजीयतेरिपुरुद्धतः। १३। यथानेक
र्मणित्यादिर्जायतेहिद्विकर्मणा॥ यथारमेणसीतैषानीयतेनिर्जनंवन
नम्। १४। अपध्यानेदुहादीनांयथारमेणदुह्यते॥ पृथिवीरत्नमुद्योतंया
च्यतेसमरेरिपुः। १५। मयाचरध्यतेबुद्धिःश्रीरामपदपङ्कजम्॥सीतयापृच्छ
तेरामःपन्थानमतिभीतया। १६। भिक्ष्यतेलक्ष्मणेनासौरामोनुग्रहमुत्त
मं॥रमेणधीयतेपाथोगंगासंभाव्यतेनुजः। १७। शिष्यतेलक्ष्मणोधर्मं
वंध्यमुदकंपाथइत्यमरः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृश्यतेदुर्जनेंधनम्॥ मथ्यतेजलधौंरत्नमेवंमादिकमूह्यताम्।२२। कर्त्तृ
कर्मणिंगत्यादेर्हेतोःस्वार्थेचकर्मणि॥ यथादृश्यरथेनोद्यैरामोयंयाप्यते
वनम्॥ ओदनःपाच्यतेविप्रैरमचंद्रेणधीमता॥ काम्यतेघोटकःशूरैः
स्त्रावकंदाप्यतेधनम्।२०। भावकर्म्मप्रयुक्तस्यादयःकेचनाधुना॥ कथं
तेकर्त्तुरिवरामःवत्सस्नेहोविलीयते।२१। उत्पद्यतेगुरुस्नेहोरामोयंध्रियं
तेवनेम्॥ वाचंमाँस्पृशतेरामस्त्रायतेभक्तिरात्मनः।२२। जायतेरामचंद्र
स्यसुखंकांतिःप्रतीयते॥ दृश्यतेसेवकंक्रुद्धःसन्यासीशस्यतेद्विजम्।२३

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वी

रज्यतेमेमतीरामेधियतेखड्गमस्त्रधृक्॥ दर्पःभ्रुकुंचितेरामेखिद्यतेविरहीजनः।२७। रामःप्रपूर्य्यतेविश्वंकीर्त्यानैवविमृश्यते॥शूरैर्यशःक्षतेयुद्धेरामोयंपीयतेपयः।२८। शस्त्रंचबुध्यतेरामःसन्नान्यंमन्यतेजनः॥रामोनत्प्यतेहुंतुंदूयतेविरहातुरः।२९। हूयतेक्षीयतेचासौहीयतेपर्णवेश्मनि॥डीयतेभयतःपक्षीमतिरेषाप्रमीयते।३०। जानकीध्रियतेरामंसविताहीयतेवरः॥प्रीयतेरामचंद्रोसौग्रमोदीनात्रभीयते।३१। चंद्रमादीप्यतेरत्रौसमुद्रोस्मान्प्रपूर्य्यते॥कौशल्यासूयतेरामंकाश्यांचम्रीयते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्त्तरि।२८। एतादृशनिरूपणेभवेद्भावकर्म्मणोः॥अन्योन्यमिथ
थाप्राप्तमुक्तंस्वयमेवचं।३०। इत्थंप्रबोधचंद्रिकायांकर्त्तृविवेज
रूपनेः॥विभक्तिचंद्रिकामथेसमाप्तात्यादिचंद्रिका।३१। अथकि
द्धारकाणीहकथ्यन्तेकथितान्यपि।अथीयतोविभक्तीनांकारक
त्वेनदर्शिताः।१। कर्त्तृचकर्म्मकरणंसंप्रदानंतथैवच्च॥अपादानं
१२ तथाधारस्तिषट्कारकानिवै।२। संकर्त्तृयःक्रियांसाक्षादुत्पाद
यतिसर्वतः॥तत्कर्मक्रियायांयत्तुविषयीक्रियतेतरां।३। क्रियानि

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्कास्यते २

यस्मात् २

ष्याघ्नतेयेन करणेक्तहेदाहृतौ॥ संप्रदानेतदाख्यातंयस्मैसम्यक्प्रदीय
तेऽथ। यद्ध्रौव्यतेनूनंतद्पादानमुच्यते॥ यत्रैवाधीयतेसर्वंसएवा
धारउच्यते॥ स्वतंत्रहेतुकर्म्मोक्तानुक्तकर्त्तेतिपंचधा॥ उदाहरणमे
वैषांरूपमाविर्भविष्यति॥ १ स्वतंत्रकर्त्तासंभवेन्निरपेक्षःक्रियासुयः॥
यथाभजाम्यहंरामंभक्तेरामःप्रसीदति॥ २ सहेतुकर्त्तीभवतिकुर्वंतं
प्रेरयेत्तुयः॥ यथायातिवनेरामःपित्रातेयाप्रचोदितः॥ ३ गतिबुद्ध्यर्थना एतेषुयोगेषुस
र्थेषुशब्दकर्म्मस्वकर्म्मसु॥ अहेतौयोभवेत्कर्त्तासहेतौकर्मजायते॥ ४॥ त्सु २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गमनार्थंयथारामोवनंगच्छतिधार्मिकः॥रामंदशरथोराजाविपिनंगम
यत्समुम्।२०। नीवह्योर्गमनार्थेषुघ्रतिषेधोभवेद्यथा॥जानकीनय
तिश्रीमानयोध्यांरघुसुतः।२१। जनकोनाथयत्सैतांसीतांरामेणधी
मता॥एवंवहेरुदाहार्य्यमथबुध्यर्थधातुषु।२२। लक्ष्मणोबुध्यतेका
र्य्यंरामस्तंबोधयत्सदः॥भक्षणार्थंयथारामोभक्तंभुंक्तेक्षुधाकुलः।२३।
रामंभोजयतिश्रीतासीतासचतंमोदनं॥भक्षणार्थंनिषेधःस्याद्वा
क्यस्तुनयथा।२४। रामोन्नमतिसीतान्नंरामेणोदयतीक्षितं॥एवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खादन्तिरमोन्नेतेनरखादन्तेघ्रियां।२५। श्रद्धकर्मसुरमोसौश्रुत्वंपठन्नि
बुद्धिमान्॥तंगुरुःपाठयेत्तेनंनिवेधोक्तयतेर्यथा।२६। एवंगृह्णन्तिश्रीमा
न्रमंसंतंरणवलंरिपुंस्नेत्र रमेणहापयत्येषमहाबलंविभीषणः।२७।
भकर्मसुयथारमःशेतेतंशपयत्तसौ॥सीतांनिवेधःक्रंद्रेश्चतथाश्रद्धा
यतेरपि।२८। यथासौक्रंदतेसीतांसीतयाक्रंदयतेसौ॥रमचंद्रस्यधिर
हैवंश्रद्धायतेरपि।२९। हरतेश्चकरोतेरप्यभिवाहिदृशेरपि॥विकल्पः
कथितःप्राज्ञैस्तथोदाहृयतेमया।३०। पाठेयंरामचंद्रस्यलक्ष्मणोहरतिस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्नामशब्दे अर्थः

यो॥हारयत्येषपाथेयंलक्ष्मणंलक्ष्मणेनवा॥२१॥करोतिलक्ष्मणःकार्यंरामः
कारयतिदुर्नौ॥लक्ष्मणंकार्यमधुनालक्ष्मणेनेतिवाभवेत्॥२२॥अभिवाद
यतेरामोगुरुंहितौयथापुनः॥अभिवादयतेरामंगुरुंरामेणवापिता॥२३॥
लंकांपश्यतिरामोयंरामंदर्शयतेकपिः॥लंकांरामेणवैत्येवमुदाहरणमु
क्तौ॥२४॥उक्तादन्यत्रनास्त्येवहितौकर्त्तुश्चकर्मता॥पाचकाश्चपचंत्य
न्नंपाचकैःपाचयत्यसौ॥२५॥क्रापयत्येवशूद्रेणदापयत्येवतेनवै॥इत्येव
मादिबोद्धव्यमनुक्तमपिबालकैः॥२६॥कर्मकर्त्तायथारामस्यौदनःपच्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेस्वयोऽउक्तकर्त्तीयथारामोरावणंहंतिसायकैः।२७। अनुक्तकर्त्तीचयथा
रामेणहन्यतेरिपुःसर्वत्रान्योक्तेप्रथमातृतीयानुक्तकर्त्तरि।२८। निवर्त्तै
र्विकार्य्येचप्राप्यंचैनित्रिधाभवेत्॥ कर्मतत्सप्तधोक्तंयैसिद्धितानीप्सि
तादिना।२९। अनिर्वर्त्तंहियत्पूर्वंतन्निर्वर्त्यमुदाहृतं॥ घटयामिसुवर्णानि
रामचंद्रस्यकुंडले।३०। इत्यादीनिनिवर्त्यानिह्यनुक्तमपिचैप्सितं॥ विकृतं
क्रियतेयत्तुतद्विकार्यमुदाहृतं।३१। रामःकांडंडुलुमात्मेषकांडकरोतिको
शलो॥ सिद्धमेवान्यतोयत्तुप्राप्यतेप्राप्यमीप्सितं।३२। यथास्मरामिरामंचरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मचंद्रंभजाम्यहम्॥ कंदर्पश्चरमूढात्मासीतांहरतिरावणः।३३। क्रोधो
द्धःखादतिविषमितिग्राह्यमनीप्सितं॥ईप्सितानीप्सितंग्राह्यंयथाबालः
क्षुधाकुलः।३४। भुनक्तिसरजस्कान्नंफलंधूलीमलीमसं॥ क्लेनदुह्यतेदुग्धं
गौरेषातुपयस्विनी।३५। इदंचोक्तंतंग्राह्यमुक्तंचोत्तरंवगम्यताम्॥उपयो
गनिमित्तंयत्तदेवोक्तंतंमतम्।३६। कर्त्तृकर्मयथाराजःसीतांकारयती
प्सितम्॥ करणंद्विविधंप्रोक्तंबाह्यमाभ्यंतरंयथा।३७। शरीरावयवंयत्तुबा
ह्यंतरमुच्यते॥ तस्मिन्नेवाह्यमाख्यातंतद्योर्वाह्यंनिगद्यते।३८। रामोरावं

उपयोगयोहन
नीजनसोहनि
मित्तयेकसोन
नयागकहवे
त २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एमूर्द्धानंनिकृन्तानिशितैःशरैः।।अयोध्यान्होत्वयायानिजानकीसहरघवः
३६।।आभ्यंतरंयथारामंमात्मनैवभजाम्यहम्।।सीतावलोकनेरामंमनयना
ननसस्मितम्।४०।सानुरागंकटाक्षेणरामःसीतांविलोकतो।।संप्रदानं
त्रिधात्रोक्तंत्रैरकेचानुमंत्रिकम्।४१।अनिरुक्तैकेचैनितत्त्रैकमुच्य
तो।।मुक्तिंभक्तायरामोसौदत्तिकरुणान्वितः।४२।मंत्रंमुक्तिंप्रदेहीतित्रै
रणास्त्रैरकंमतं।।अथानुमंत्रिकंकिंचिदुच्यतेतापसोवने।४३।रामायेनिथ
वेदत्तेफलमूलेयथाविधिः।।अत्रैरणास्त्रमंत्रस्यचानुमंत्रेएकर्मणा।।अनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्रिकंभवेदेतदनिराकर्त्तृकंयथा।४४। पंचोपचारंरामायभक्तलोकःप्रयच्छति॥अनिराकरणादेतदनिराकर्त्तृकंपंथा। तथाअपादानंद्विधात्रोक्तं

करारक्षात

चलंचोच्चलमेवच॥चलाद्देशांतरान्नारिएंनिर्यात्तिविषमंविषम्। ४६। अचलंचयथारक्षात्मत्रंरामेपतत्यधः॥हिमाद्रेरागतागङ्गासमुद्राद्रत्नमुत्थितं। ४७। चतुर्द्धाधिकरणंतत्रोभिव्यापकंतथा॥रामभक्तेभवेन्मुक्तिःसीतायांचपतिव्रतं। ४८। तद्दीपश्चेष्विकंरामःश्रीमान्सिंहासनेस्थितः॥स्थितंचवीक्षतेभूयोवैदेहीशयनेस्थितां। ४९। अथवैषयिकंरामोयोध्यायांवसन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वयं॥ वनेवसन्तिशार्दूलःसिंहश्चगिरिगह्वरे। ५०॥ अथसामीप्यिकेराम॑ः कपि
सैन्यसमन्वितः॥ अवात्सीत्सागरेचोरेगंगायांवसतिंस्वयम्। ५१॥ ननुसंबंध
स्यकिंन्नकारकत्वमिहोच्यते॥ कारकंहिक्रियाहेतुःसंबंधस्योप्रधानतः॥ ५२॥
साक्षात्क्रियाभिसंबंधःकारकंहिविदुर्बुधाः॥ स्वातंत्र्यस्यविवक्षायांस्थालीपच
तिंसेवकः। ५३। पाचकःपचतीत्यादौयथास्यात्तंत्रतोभवेत्॥ नतथात्का
पिसंबंद्धेयथारामस्यसेवकः। ५४। इतिप्रबोधचंद्रिकायांकृतौवैजलभू
पतेः॥ समासांसकलाश्चार्य्यास्कारकचंद्रिका। ५६। समासःषड्विधोनाम्नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञेयस्तत्पुरुषस्तथा॥कर्मधारयसंज्ञश्चबहुव्रीहिस्तथैवच॥३॥द्विगुर्द्वंद्वोव्य
यीभावः प्राधान्यंचचतुर्विधं॥पूर्वोत्तरोभयान्येषांपदार्थानांविकल्पना
त्॥२॥तत्पुरुषोद्विप्रधानस्तत्रतुपूर्वप्रधानकं॥प्रधानतायथापूर्वका
यश्चापरकायवत्॥३॥अथोत्तरपदार्थस्यप्राधान्येरामैवंकंद्विप्रधा
धानस्तंकर्मधारयोपिभवेद्यथाष्ठ॥रामःपुरुषसिंहोयंपूर्वप्राधान्यमी
दृशम्॥नीलोत्पलमिवास्याक्षीचित्युत्तरपदार्थता॥५॥द्विर्प्रधान्यंबहुव्री
हिरुभयत्रचोभयत्रचान्यत्रान्येयंप्रधानंचसंसमासोनिरूप्यते॥६॥स्म

से

थां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरामौहमनिशंसुभयत्रपदार्थके॥ग्रधानतायथाद्वित्राःपंचवाःसप्तवास्तथा
॥७॥उभयत्रपदार्थेचंद्वंद्वेग्राधान्यमिष्यते॥गुरोरादेशतोरामलक्ष्मणौव
नगामिनौ॥८॥चिग्रधानोव्ययीभावःपूर्वस्मिन्नर्थपदार्थके॥उत्तरस्मिंस्त
थान्यस्मिन्ग्रधान्यमिहसर्वतः॥९॥यथोपरंमेनिष्ठामिलक्ष्मणस्येदृशं रामस्यसमीपं
वचः॥उरेतेत्रयथानैवसंसारेत्रसुखंक्वचित्॥१०॥अन्यत्रत्नुयथोन्मत्तगं सुखस्यलेशः
ति॰ गंदेशेतिशोभनः॥एषामेवंविधंकारणंग्राधान्यंकथितंमया॥११॥समा
सानांपुनश्चैषांचातुर्विध्यंनिगद्यते॥स्यान्नित्यत्वमनित्यत्वंसुप्तंचासु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेवच। २२। तत्रनित्यसमासोयंकुंभकारोस्त्रस्रावकः॥अनित्योरजपु
रुषोराजःपुरुषइत्यपि। २३। लुक्समासोयथाराजःस्म्राट्पुरुषपुंग
वः॥अलुक्समासश्चयथाः कंठेकालोयथाहरः। २४। अथैषांसमा
सानांभेदःप्रत्येकमुच्यते॥तत्रोपपदतत्पुरुषोविभक्तिश्चानभेदतः। १५।
स्यात्प्रथमातत्पुरुषःपूर्वकायोधराङ्गकम्॥स्याद्द्वितीयातत्पुरुषोधन्यो
रामाश्रितःपुमान्। १६। स्यात्तृतीयातत्पुरुषोयथाधान्यार्थइष्यते॥स्या
च्चतुर्थीतत्पुरुषोयूपदारुनिरुज्यते। १७। स्यात्पंचमीतत्पुरुषोनमेश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युभयंक्वचित्॥ भवेत्षष्ठीतत्पुरुषोरामभक्तोभवाम्यहम्॥२७॥ स्यात्स
मीतत्पुरुषोभक्तिशैंडौमुरद्विषः॥ नञ्तत्पुरुषोद्वेषःयथानेकोरि
प्रियः॥२९॥ शौंडधूर्त्तकितवव्याडप्रवीणसवितालरधीतपूतपंडितकुश
लचपलनिपुणानिएतेशौंडगणाः॥ कर्मधारयएवंस्यात्सप्तधासुनिगद्य
ते॥ विशेषणंपूर्वपदोयथानीलोत्पलंवरम्॥३०॥ विशेषणोत्तरपदोयथा॥
द्विखसूचकः॥ विशेषणोभयपदोयथाशीतोष्णसमसुखम्॥३१॥ उपमान
पूर्वपदोरामश्यैनस्मरोत्तमः॥ उपमानोत्तरोरामचन्द्रःपुरुषकेशरी॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संभावनापूर्वपदोरामशूरोभवान्यहम्॥अवधारणपूर्वपदोयथारम
धनंमम।२३। सप्तधास्याद्बहुव्रीहिर्द्विपदस्तत्रकथ्यते॥प्रथमार्थेवि
हायासौभवेत्षड्विभक्तिषु।२४। यमेनुरक्तरामोहंचिरंसेवितराघवं
उपनीतवतीरामोलंहविगतकल्मषः।२५। कृतप्रणामोरामोघमित्या
द्विपदोभवेत्॥अथोबहुपदैःकश्चिद्बहुव्रीहिर्निगद्यते।२६। पराक्रमो
पार्जितयशोरामचन्द्रोमहीपतिः॥सुग्रीवकृतसेवोसौविक्रमोत्तरवा
णः।२७। संख्योत्तरपदोरामोबहुव्रीहिर्निगद्यते॥उपविंशेषुपदशे-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केशेषुकेशेषुयुग्म
हित्वाग्रस्तंयुङ्ग ३

पुनरस्मेरामभेवस्मरम्यहम् । २८। संख्योभयपदोद्येवंद्विर्मानुव
र्त्तिनः।सहपूर्वपदश्चायंस्यानंदोरघुनन्दनः। २९। यतीहारस्वभावश्च परस्परव्यवहारस्य
यथायुङ्नसम्मतम्।।केशेकेशेसतान्तोपिदण्डादण्डिसमीहितो ३०। दिग
न्तरालविषयोयथादिक्पूर्वदक्षिणा।।इयमुत्तरपूर्वास्यादियंदक्षिणपश्चि
मा ३१। द्विगुर्द्विधैकवद्भावीनैकवद्भावितान्वितः।।आद्योयथापंचपूली
त्रिशृंगी-चक्रतुत्रयी। ३२। यथावानैकवद्भावीत्रिलोकाश्चतुर्दशः।।
अथद्वंद्वसमासश्चचतुर्द्धासनिगद्यते। ३३। समुच्चयान्वाचययोः समा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिप्रधानोऽव्ययीभावः पूर्वस्मिंश्चपदार्थके ७

सोनैवसिद्ध्यन्ति॥इतरेतरेसमासोयंयथानौरगमलक्ष्मणौ।३४। रामलक्ष्मणश्चुघ्नाजयंतिरिपुमंडलीम्॥समाहारोयथाशंखपटहंगोभतेधुना ॥३५। भेरीमृदंगमनिशंश्रृंजनयंतिस्फुटम्॥द्विधास्याद्व्ययीभावो नामपूर्वपदोयथा। ३६। नसुखप्राप्तिसंसारेनसुखप्राप्तिमेगृहे॥स्याद्व्ययपूर्वपदोयथास्यादुपनदीरणे।३७। अहर्न्निशंमेमनसिस्थितिष्ठतिसुखान्वितम्। ३८। इतिप्रबोधचंद्रिकायांवक्तोवैजलभूपतेः॥समासचंद्रिकाह्येषासमासाविश्वकाशिनी।३९॥तद्धितास्त्रिविधाज्ञेयाः

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केचित्सामान्यवृत्तयः॥ केचिद्व्यपसंज्ञाश्चकेचिच्छब्दार्थवाचकाः॥१॥ सा
मान्यवृत्तयस्तत्रकथ्यंतेकेचनाधुना॥ गुणैस्यास्तीतिगुणवान्रामोगु
णवतीप्रिया॥२॥ गुणवद्राघवकुलमेवंसर्वत्रबुध्यताम्॥ चूडालोरामच
द्रौसौचूडालश्चैवलक्ष्मणः॥३॥ त्यादिभिस्तद्धितैःकृद्भिःसमासैश्चविधीय
ते॥ यदेवकारकंतत्रप्रथमैवंचनान्यतः॥४॥ उक्तानांहिपदार्थानांन्यायैः
संख्यैवगृह्यतेऽतस्तद्धितसमासैस्तुलिङ्संख्याविभक्तयः॥५॥ यथार
हसिरामेणसानुरागेणसादरम्॥ पीयंतेप्रेयसीवाचःसुधारससहो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशः।६। रिपुंजयतिरामोयंस्वनेत्वरामेर्वाजीयतेरिपुः।सीतामुखेनजी
येतेपूर्णेन्दुविकचाम्बुजे।७। रामोसौकारकःसीताकारिकाकारकंकु
लम्।ऊचेरुत्कर्त्तरीत्यस्यलिंगादिभजतेतराम्।८। रामश्चवैयाक
रणःसावैयाकरणीवधूःतद्वैयाकरणंसैन्यमित्थंभवतितद्धितेषु।९।
रूतघ्रणोमोरमोयंरूतघ्रणांतत्कुलं।सीतारूतघ्रणामैथांस
र्मसुःकारकेरूतेः।२०। अरूतिर्विरूतिश्चापिस्याद्युक्तौचेयदानहा।।वा
चकैःअरूतेसंख्यागुणतेविरूतेर्नहि।२१।जायतेतंतवोरामपटैःस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्णानिकुंडले॥ दृयंतेरामचंद्रस्यपच्यन्तेऽन्नेचतण्डुलाः॥२१॥ तंतवोरा
मचन्द्रस्यपटोभूत्वाश्चतण्डुलाः॥ कृत्वाश्चौदनमित्यादौलिंगादिकमि
ह्यते॥२३॥ प्रधानेकर्मणिभवेत्वाचकोहिदिकर्मणाम्॥अप्रधा
नेदुहादौसंहितौकर्तुश्चकर्मणि।२४। अयोध्यान्नीयतेसीताएमेण
गुरुकर्मणा॥ रामोयंयाप्यतेभिक्षांवनंसत्यवशात्मना॥ गुरुणाभा
व्यतेशिष्यःशास्त्रंवाभोज्यतेपयः॥२६॥ यवक्षेद्यंविशेष्यंस्यात्वचेद्
कंमुक्तमम्॥ तद्विशेषणमाख्यातंपदव्युत्पत्तिकोविदैः।२७। एमा
३ रामोचंयाच्यतेमुक्तिंमयासंसारभीरुणा॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विधा तकोदण्डद्विभेतिं युधिरावणः॥रामस्यरावणानीककालस्यसु
धिविक्रमः।१८। रामेविहरतिस्फीतालक्ष्मीरहर्न्निशम्॥जान
कीवदनाम्भोजमधुपानमधुव्रते। १९॥अत्रोद्यस्यविधेयत्वेत
त्रोर्थेनियमोनहि॥स्यात्तुतदंजहल्लिंगमजहद्वचनेनयत्।२०।राम
भक्तिःप्रमाणंस्यात्कर्त्रणाभाजनेहरिः॥मुक्तिक्षेत्रेमियंकाशीह्लेज
हल्लिंगमीदृशम्।२१। रामदारार्थसीतेयंस्त्रीयमप्यरसत्वलुः॥रा
मभक्तिर्मुक्तिगहोअजहद्वचनेस्थिरम्।२२। बहुव्रीहिसमासेहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वलिङ्गानिजहृत्यमी॥सर्वशब्दैर्विशेष्यस्यलिंगादिकमुपासते।२३।अ
ङ्गीकृतघ्रणमोयंरामोवीक्षितदारकः॥अनादृताप्सरास्त्रे यमित्याद्य
मवगम्यतां।२४। उपमानोपमेयत्वंस्याद्भेदैर्लिंगसंख्ययोः॥अभिन्नैव
विभक्तिःस्यादुपमानोपमेययोः।२५। लिंगभेदेयथारामपत्नीमंदगतिः
परम्॥मत्तमातंगइवसामंजुवाक्पुरपुष्टवत्।२६। यथावचनभेदेच
कंदर्पइवसुंदरः॥यूयंयुवानोरामस्यभक्ताअहमिवोत्तमाः।२७।त्वांरा
ममिवपश्यामिरामेणैवत्वयाजिताः॥दुर्ज्जेयाःशत्रवःसर्वेरामायैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमोस्तुते। २८। स्वतोरामादिवाशेषारणेविभ्यत्तिश्रवः॥रामस्येवचनेहे
वाकीर्त्तिस्त्रैलोक्यगामिनी। २९। स्वयिरामइवप्रीतिंभजंतेसकलाजनाः॥
एवंलिंगत्रयेपिस्याद्वचनत्रितयेपिच। ३०। विंशत्याद्याःसदैकत्वेसंख्या
संख्येयसंख्ययोःसंख्यायन्तेयदासंख्यास्तदाद्वित्वादिकंभवेत्। ३१। विं
शतीरामभक्ताःस्युकोटीरामस्यभक्तयः॥सहस्रंरामभक्तास्युर्विंश
तीरामभक्तयः। ३२। लक्षंचरामभक्ताःस्युःकोटीरामस्यभक्तयः॥सं
ख्यायंतेयदा[illegible]दाद्वित्वादिकंभवेत्। ३३। यथाविंशत्यस्तिस्रोस्तिस्रः
संख्यास्त

२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सैन्यानिकोटयः।समुच्चयेनवाकंचेद्वहूनांवाहूयोश्ववा॥अन्वाचयाश्रिता
संख्यावाचकानांविकल्पतः।३५। रामंचेद्रश्वसीताचवनंगच्छतिगच्छतः॥रा
मश्चल्क्ष्मणश्चापिभरतश्चप्रयांतिच।३६। प्रयातिवापुरींस्वीयांजेताजेतारए
वंवा॥तेजस्विनंस्तेजस्वीचगुणीगुणिनएवच।३७। पुरुषेषुत्रिषुभवेद्यत्रवा
पुरुषःपरः।समुच्चयेसएवस्यात्संख्यावापितदग्रिमा।३८। यथारामश्चसीते
त्यंगच्छथोविपिनंवनं॥रामस्त्वमहमप्याशुगच्छामोगुरुशासनात्।३९। अ
हंचत्वंचरामश्चगच्छेमुर्निर्जनंवनम्॥यथमादिक्रमादेवप्रत्ययोऽन्तरेपिच।४०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेज०
२४

४ लक्षणाकथनेसापिद्विविधास्यान्नयोगतः ४३॥

मुख्योगौणोत्राक्षणिकः प्रयोगस्त्रिविधोभवेत्॥मुख्यस्स्वार्थेनसंपन्नोयथा
सन्नेरघूद्वहः।४१। गुणयोगाद्वेद्वौलोरामक्रोधोविषंमहत्॥रावणंप्र
तिरामोसौसिंहश्चकरिणंप्रति।४२। स्वार्थैकदेशयानांवाप्येतुतात्पर्य्यस्यानु
रोधतः॥जहत्स्वार्थाजहत्स्वार्थातत्राद्याकथ्यतेमया॥स्वार्थत्यागोभवेद्यत्र
जहत्स्वार्थेतिसायथा।४४। रामोरमतिपाथोधौयमुनायांजनार्दनः॥यष्टी
र्भोजयतद्वाश्चरतद्वावदतिसंसदि।४५। यत्रस्वार्थापरित्यागोजहत्स्वा
र्थाचसायथा॥क्षत्रियेणयांसमीकाशींकाकेभ्योदधिरक्षतां।४६। पदार्थे

राम
२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदार्थेपितात्पर्य्यात्लक्षणान्वयः॥एवंसर्वत्रवोद्व्यमनुक्तमपिवाक्यैः॥४७॥ जातिव्यक्तिपरत्वेनद्विधाशब्दप्रवर्त्तनं॥तत्रजातिपरत्वेनयथा त्वंभोजयाग्निधिम्॥४८॥अत्रैकत्वमतंत्रंस्याद्भोजनेचाग्नियोगिता॥ ब्राह्मणान्भोजयेत्युक्तेश्रोतात्रीन्भोजयत्यसौ॥४९॥जात्याभोजयितुंनैव शक्नोमीत्यवधार्य्यसः॥त्रीनेवभोजयेत्याशुतात्पर्यानवधारणे॥५०॥ तात्पर्यविषयेशब्दःप्रमाणमितिनिश्चितः॥श्रोतातदनुसारेणशब्दबोध्येप्रवर्त्तते॥५१॥विशेष्यंक्रियायास्यादुक्तेकर्म्मादिकंपुनः॥विशेषणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रियाप्याहुतदेवेतिशुनिश्चितं॥ ४२॥ यथामुक्तावनेरागमःश्रयातिभार्य्यया
सहाग्रेणगम्यतेयोध्यावनात्भुक्ताफलानिच॥ ४३॥ उक्तमेवोक्तमो
यातिक्वचिदुक्तमनुक्तंतामाभनुक्तमपिचोक्तंस्यात्क्वचिदेवपदांतरैः॥
४४॥ उदन्वःपच्यतेदृष्टोमयासत्युक्षोप्ययम्॥ आरूढवानरोवृक्षंसिंह
यतेदृश्यतेपिवा॥ ४५॥ पटोयंश्लक्ष्णिकोभातिरागेणपरिधीयते॥ कूदाद्रिमि
र्यदेवोक्तंत्यादैरपितदेवहि॥ ४६॥ नृत्यंतंवानरंरागोविलोकयतिकौ
तुकी॥ छात्रंचवैयाकरणंश्वानंपच्छतिलक्ष्मणः॥ ४७॥ आरूढवानरंवृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षंरामः प्रश्नतिसादरं॥ कृत्वार्थेन्नोक्तमेवैतदनुक्तंत्याद्दिनाभवेत्॥५८॥
न्त्यतेगीयतेरागोनटेनस्थीयतेक्वचित्॥भोक्तुंपचतिरामोयमोदनंक्षु
द्दिसागतः॥५९॥ रामभक्तःसमाहूयरामंभोजयतिस्वयम्॥इत्यादनुक्त
मेवास्यादनुक्तमितिबुध्यताम्॥६०॥ कर्मयत्स्यात्ययेनान्यत्क्वचिदप्युच्य
तेयथा॥ कृष्णेनदुह्यतेगोभ्यांगवांगोरथवापयः॥६१॥ मयाप्रयाच्यते
मुक्तीरामइत्यस्यरामवैः॥पाच्यतेरामचन्द्रेणयाचकेनोदनोद्युतः॥६२॥
क्वचित्कालादिकंचैवसत्येचान्यस्यकर्म्मणःरागमेलश्रूयतेधर्म्मीयो

K K S U LIBRARY
RAMTEK
441 106
M-1895
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गेसंगीयतेनटैः।६२। कांतेनगम्यतेक्रोशंकान्तयास्निग्धचेतसा॥अ
न्यच्चकर्म्मएोसत्वेकालाद्यप्याहुकर्म्मजः।६३। कुंभकर्णेनसुप्तेव
एमासारंमभूभुजा॥ वनेद्वादशवर्षाणिस्थीयतेगुरुशासनात्।६५।
इतिश्रीबोधचंद्रिकायांकस्तौवैजलभूपतेः॥इत्युक्ताचंद्रिकासम्यक्
समाप्तामनोहरा।६६।५॰ संवत् १९८६ माघशुद्धसप्तमीतिथौरवि
वासरे ॥ श्लोकसंख्या २८० ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥

२५२०

K K S U LIBRARY
RAMTEK
441 106
M-1898
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.10.20 11:14
,TRANSFERRED=2020/10/16 at 11:21:09
,PAGES=52
,TYPE=STD
,NAME=S0004036
,Book Name=M-1895-PRABODH CHANDRIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection